# महामहोपाध्यायः प्रा. के. टि.पाण्डुरङ्गिवर्यः

**सन्दर्शकः- विद्वान् टि. एन्. प्रभाकरः**

संस्कृतस्य अध्ययनाध्यापनसंशोधनेषु प्रा. कृष्णाचार्य तम्मण्णाचार्य पाण्डुरङ्गिमहाशयस्य नाम चिरपरिचितम् । ९३वर्षीयोऽयं पण्डितप्रवरः धारवाड-कोलार-बेङ्गलूरुनगरीयेषु सर्वकारीयमहाविद्यालयेषु संस्कृतोपन्यासक आसीत् । सेवान्तेऽयं बेङ्गलूरु-विश्वविद्यालयस्य संस्कृतस्नातकोत्तरविभागीयस्थापक-विभागाध्यक्षः आसीत् । तथैव मिथिक् संस्थाध्यक्षेण सता अनेन पूर्णप्रज्ञ-विद्यापीठस्य कुलपतिपदमलङ्कृत्य संस्कृतसेवा कृता । महामहोपाध्यायः प्रा. के. टि. पाण्डुरङ्गिवर्यः भारतस्य राष्ट्रपतिपुरस्कारेण, कर्णाटक-राज्यप्रशस्त्या, अन्यैः दशाधिकैः पुरस्कारैश्च विभूषितः । शताधिकानि शोधलेखनानि दशाधिकानि मौलिक-पुस्तकानि च अनेन महाभागेन संरचितानि । महाविद्यालयशिक्षणविभागीयस्य मैसूरुवलयस्य सहनिर्देशकेन प्रा. टि. एन्. प्रभाकरेण प्रा. पाण्डुरङ्गिमहाशयः वार्तापत्राय सन्दर्शितः । अस्य मुख्यांशान् प्रकाशयितुं वार्तापत्रं प्रमोदते ।

**– सम्पादिका**

**सन्दर्शकः –** वन्दनीय पाण्डुरङ्गि आचार्य, कर्णाटकसंस्कृतविश्वविद्यालयस्य वार्तापत्रं भवन्तं सन्दर्शितुं मुदमनुभवति । भवतां सन्निधौ मामकाः केचित् प्रश्नाः उपस्थाप्यन्ते ।

**पाण्डुरङ्गिवर्यः –** स्वैरं हि पृच्छ्यताम् । संस्कृतविश्वविद्यालयः बहुमुखशैक्षिककार्याणि निर्वहतीति भूयसे प्रमोदाय कल्पते ।

**सं –** पण्डितवर्य, अत्रभवान् भवान् संस्कृताध्ययने कृतभूरिपरिश्रमः । देशेषु विदेशेषु च भवान् विख्यातः । अतः संस्कृताध्ययनं भारते कथं प्रवर्तते इति उद्बोधयितुं शक्यते वा ?

**पा –** निश्चयेन । सामयिकोऽयं प्रस्तावः । भारते संस्कृताध्ययनं द्वेधा प्रवर्तते । परम्परागतशास्त्रीयरीत्या महापाठशालासु, गुरुकुलेषु पण्डितगृहेषु च प्रवर्तते । नवीनविधानेन आधुनिकविश्वविद्यालयेषु कलाशालासु च प्रवर्तते । प्रथमप्रकारे शास्त्रग्रन्थानां प्रतिपदं प्रतिवाक्यं च पाठः भवति, येन व्युत्पत्तिः सम्पाद्यते । पूर्वस्मिन् शतके शताधिकाः महापाठशालाः प्रादेशिकनृपैः संस्कृताभिमानिभिश्च स्थापिताः पालिताश्च । इदानीन्तनकाले राष्ट्रियसंस्कृतसंस्थानद्वारा अङ्गीकृतासु आदर्शपाठशालासु परम्परागतक्रमेण शास्त्रपाठाः, साहित्यपाठाश्च प्रवर्तन्ते । मिलित्वा शताधिकाः छात्राः शास्त्रनिपुणाः साहित्यकोविदाः भवन्ति । विश्वविद्यालयेषु कलाशालासु च विद्यार्थिनः संस्कृतम् अधीरते । सहस्रशः छात्राः संस्कृतं भाषात्वेन पठन्ति । विशेषविषयत्वेन शताधिकाः पठन्ति । तथापि सङ्ख्येयम् अतृप्तिकरी । परन्तु भारतस्य सर्वप्रदेशेषु अधीयमाना भारतीयभाषा केवलं संस्कृतमेव ।

**सं –** आङ्ग्लभाषा सर्वत्रेदानीं पाठ्यते । तद्विषये भवतां प्रतिक्रिया का ?

**पा –** यद्यपि विश्वविद्यालयेषु कलाशालासु च आङ्ग्लभाषा पाठ्यते, तथापि तस्य ज्ञानं सार्वत्रिकं न भवति । भारतीयजनसङ्ख्यायां ५% जनाः एव आङ्ग्लभाषां जानन्ति । परन्तु सर्वेऽपि जनाः प्रान्तीयभाषामेव जानन्ति । संस्कृतभाषा तु सर्वप्रदेशेषु पण्डितप्रपञ्चे च परिचितास्ति । जनाः प्रान्तीयभाषाभ्यासेनापि परोक्षं संस्कृतं किञ्चिद्वा जानन्त्येव ।

**सं –** श्रीमन्, भवतां संस्कृताध्ययनं सकृत् स्मर्यते वा ?

**पा –** अस्तु । प्राचीनशास्त्रपद्धत्या मम पितुः पदमूले एव काव्यनाटकान्यधीतानि । तदनन्तरं साङ्ग्लिनगरे, मैसूरुनगरस्थमहाराजसंस्कृत-पाठशालायाम्, अण्णामलैविश्वविद्यालये च अधीतम् । पश्चात् प्रौढशालाशिक्षकत्वेन नियुक्तोऽहम् । अनन्तरम्, आधुनिकाध्ययनविधानेन मद्रास्विश्वविद्यालये काशीहिन्दूविश्वविद्यालये च मया बाहयविद्यार्थिना सता बि.ए., एम्.ए. च अधीतम् । हवले दिगम्बरशास्त्री, दण्डपाणि दीक्षितः, कुप्पुस्वामी शास्त्री, बि.एन्.के.शर्मा, के.श्रीनिवासाचार्यः च मम प्रातःस्मरणीयाः गुरुपादाः।

**सं –** नवनवीनशिक्षणशाखासक्तानां सामान्यजनानां कृते संस्कृतज्ञानं कीदृशं स्यात् ?

**पा –** अद्यतनदिनेषु बहुजनानां मनस्सु 'न मया संस्कृतमधीतम्' इति विषादभावः दरीदृश्यते । अतः, तादृशेभ्यः, तथा च इदानीं ये शिक्षादाने विद्यालयं प्रविष्टाः तरुणाः, तेभ्यः संस्कृतस्य प्राथमिकं ज्ञानं सुभाषित-पञ्चतन्त्रकथा-भगवद्गीताद्वारा प्रदातव्यम् । सरलमहाकाव्यनाटकानां कञ्चिद्भागं पाठयित्वा संवादगोष्ठ्यः आयोजनीयाः ।
अन्त्याक्षरी, वक्तृत्वकौशलस्पर्धा अपि संयोजनीयः । येन ते भाषापरिचयं मौल्यपरिचयञ्च प्राप्नुयुः । 'नष्टं लब्धम्' इत्यपि भावनोदीयात् तेषु ।

**सं –** संस्कृतशास्त्राणि वर्तमाने भौतिकयुगे कथम् उपादेयानि भवन्ति ?

**पा –** यद्यपि अद्यतनकालस्य प्रगतविज्ञान-विचाराः संस्कृतशास्त्रेषु न सन्ति, तथापि आधुनिकविज्ञानस्य बहवो मूलविचाराः वैशेषिकसाङ्ख्येत्यादि शास्त्रेत्यादि शास्त्रेषूपलभ्यन्ते । परमाणुवादः, परिणामवादः अत्रोदाहरणीयौ । वृक्षलतादिकोशग्रन्थाः, वज्रमौक्तिकादिकोशाः, ताम्रपित्तलादिकोशग्रन्थाः, आयुर्वेदकोशग्रन्थाः, अश्वशास्त्रगजशास्त्रादि-ग्रन्थाश्चोपलभ्यन्ते । भारतस्य दौर्भाग्यं यत् संस्कृताध्येतारः, केवलम् अलङ्कारवेदान्त-व्याकरणादिशास्त्रेष्वेव रमन्ते इति वक्तुं सीदत्ययं जनः । अतः, सहस्रशो ग्रन्थाः कालकवलीकृताः । १७शतकपर्यन्तं जगत्यस्मिन् योऽयं ज्ञानसङ्ग्रह आसीत्, सोऽयं बहुधा संस्कृते एव निहित आसीत् । अमीषु त्रिशतवर्षेषु संस्कृतभाषा आधुनिकज्ञानेन वञ्चिता । इदानीमपि यद्याधुनिकज्ञानं संस्कृतेऽवतरति, तर्हि आगामि ५० वर्षेषु संस्कृतभाषा पुनश्च परिपुष्टा भविष्यति । फ्रान्स्, जर्मनि, इटलि -इत्यादिदेशेषु आधुनिकं विज्ञानं तन्त्रज्ञानञ्च देशीयभाषास्वेव प्रवर्धितम् । तैरद्यापि आङ्ग्लभाषा नैवाश्रीयते । इयमेव स्थितिः चैना,

जपान् देशयोरपि । ऐरोप्यभाषाणां पदसम्पत् सीमिता । संस्कृतपदसम्पत् अपरिमिता । एवं सति संस्कृतं सर्वेषु क्षेत्रेषु प्रवेष्टुमर्हति । परन्तु अस्य इच्छाशक्तिः अपेक्षिता । नायं दोषः संस्कृतभाषायाः, अपि तु अस्माकमेव ।

**सं –** इदानीन्तनकाले कर्णाटकसंस्कृत-विश्वविद्यालयः कथं कार्यशीलस्स्यात् ?

**पा –** परम्परागताध्ययनरीतिः सुतरां परिरक्षणीया । सा खलु जीवातुभूता संस्कृतप्रसाराय । अनया सहैव भौतिकविज्ञानशाखानां प्राचीनभौतशास्त्र-रसायनशास्त्रगणितशास्त्राणि इत्यादीनां तलस्पर्शिबोधनाय, संशोधनाय यत्नः आधेयः । विशिष्य भाषाध्ययनम् इत्युक्ते व्याकरणशास्त्रम्, आधुनिकभाषाध्ययनस्य मूलं भवेत् । एवञ्च, धर्मशास्त्राणि आधुनिकसमाजविज्ञानेन, कौटिलीयार्थशास्त्रम् आधुनिकराजनीति-अर्थशास्त्रेण, मनुवसिष्ठपराशरस्मृतयः संविधानपौरनीति-अध्ययनेन तौलनिकाध्ययनं भवेत्, येन ज्ञानक्रान्तिः भवेत् । संस्कृते आधुनिकं ज्ञानं नास्ति इतीयमप्रथा परिहरणीया । एवंकरणेन आगामिसंवत्सरेषु भारतस्य सर्वेषु विश्वविद्यालयेषु History, Economics, Physics, Maths इत्यादिपठ्येषु भारतीययोगदानस्य सुपरिचयं कर्तुं कर्णाटकसंस्कृतविश्वविद्यालयः मूलप्रेरकस्स्यात्, येन भारतीयछात्राः स्वपूर्वजानां विषये स्वाभिमानिनः भवेयुः । स्वातन्त्र्यं च सुरक्षितं स्यात् ।

इदानीं विविधदेवालयेषु सांस्कृतिकसंस्थासु वेदान्तगोष्ठ्यः प्रवर्तन्ते । तेषु आदौ संस्कृताध्ययनगोष्ठ्यः प्रचलेयुः । सार्वत्रिकशिक्षणविद्यालयेष्वपि संस्कृतसप्ताह आचरणीयः । शास्त्रगोष्ठ्यः साहित्यगोष्ठ्यश्च प्रवर्तयितुं कर्णाटकसंस्कृत-विश्वविद्यालयः अग्रेसरः भवेत् ।

**सं –** भूयांसि नमांसि । आपृच्छे भवन्तम् ।

**पा –** शिवास्ते पन्थानस्सन्तु ।